# श्री शिव स्तोत्रं (रतिदेवि कृतं)

## श्री शिव स्तोत्रं (रतिदेवि कृतं)

नमश्शिवायास्तु निरामयाय
नमश्शिवायास्तु मनोमयाय |
नमश्शिवायास्तु सुरार्चिताय
तुभ्यं सदा भक्तकृपावराय || 1 ||

नमो भवायास्तु भवोद्भवाय
नमोऽस्तु ते ध्वस्तमनोभवाय |
नमोऽस्तु ते गूढमहाव्रताय
नमस्स्वमायागहनाश्रयाय || 2 ||

नमोऽस्तु शर्वाय नमश्शिवाय
नमोऽस्तु सिद्धाय पुरांतकाय |
नमोऽस्तु कालाय नमः कलाय
नमोऽस्तु ते ज्ञानवरप्रदाय || 3 ||

नमोऽस्तु ते कालकलातिगाय
नमो निसर्गामलभूषणाय |
नमोऽस्त्वमेयांधकमर्दनाय
नमश्शरण्याय नमोऽगुणाय || 4 ||

नमोऽस्तु ते भीमगुणानुगाय
नमोऽस्तु नानाभुवनादिकर्त्रे |
नमोऽस्तु नानाजगतां विधात्रे
नमोऽस्तु ते चित्रफलप्रयोक्त्रे || 5 ||

सर्वावसाने ह्यविनाशनेत्रे
नमोऽस्तु चित्राध्वरभागभोक्त्रे |
नमोऽस्तु कर्मप्रभवस्य धात्रे
नमस्स धात्रे भवसंगहर्त्रे || 6 ||

अनंतरूपाय सदैव तुभ्य-
मसह्यकोपाय नमोऽस्तु तुभ्यं |
शशांकचिह्नाय नमोऽस्तु तुभ्य-
ममेयमानाय नमोऽस्तु तुभ्यं || 7 ||

वृषेंद्रयानाय पुरांतकाय
नमः प्रसिद्धाय महौषधाय |
नमोऽस्तु भक्ताभिमतप्रदाय
नमोऽस्तु सर्वार्तिहराय तुभ्यं || 8 ||

चराचराचारविचारवर्य-
माचार्यमुत्प्रेक्षितभूतसर्गं |
त्वामिंदुमौळिं शरणं प्रपन्ना
प्रियाप्रमेयं महतां महेशं || 9 ||

प्रयच्छ मे कामयशस्समृद्धिं
पुनः प्रभो जीवतु कामदेवः ||
वैधव्यहर्त्रे भगवन्नमस्ते
प्रियं विना त्वां प्रियजीवितेषु || 10 ||

त्वत्तो परः को भुवनेष्विहास्ति
प्रभुः प्रियायाः प्रभवः प्रियाणां |
त्वमेव चैको भुवनस्य नाथो
दयाळुरुन्मीलितभक्तभीतिः || 11 ||

इति श्रीमत्स्यपुराणे रतिदेवीकृत शिवस्तोत्रं |